# शब्दानुशासनस्य मुख्यप्रयोजनं महाभाष्यदिशा आलोच्यताम् ॥

प्रयोजनम् अनुद्दिश्य न मन्दः अपि प्रवर्तते इत्यभियुक्त्या प्रमीयते प्रयोजनं हि प्रवृत्तिप्रदीपकम् । तस्मात् सर्वेषु शास्त्रेषु तत्तच्छास्त्रप्रयोजनं प्रतिपादितं दृश्यते । तस्मात् महाभाष्ये भगवता पतञ्जलिना तस्य प्रयोजनम् उल्लिखितम् । कानि पुनः महाभाष्यस्य प्रयोजनानि इति चेत् उच्यते – रक्षोहागमलघुसन्देहाः प्रयोजनम् इति । इदानीम् एतानि प्रयोजानानि समासेन आलोच्यन्ते ।

रक्षा- वेदरक्षार्थं हि आवश्यकं व्याकरणस्य अध्ययनम् । यतो हि लोपागमवर्णविकारैः वेदे प्रयुक्तानि त्मना देवासः गृभ्नामि प्रभृतीनि पदानि प्रमादकल्पितानि इति विविच्य अवैयाकरणैः तेषां परिवर्तने वेदस्य वेदता अपगच्छति । अतो वेदरक्षायै पठनीयं व्याकरणम् । उक्तञ्च भाष्यकृता – रक्षार्थं हि वेदानाम् अध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति इति । परन्तु गुरुशिष्यसम्बन्धो हि महान् वेदरक्षाहेतुः इति कुमारिलभट्टेन उक्तम् । परन्तु गुरोः अभावे शिष्यस्य यदि शंका जायते तदा व्याकरणमेव शरणं तस्याज्ञानस्य निराकरणे । तस्मादेव व्याकरणम् अध्येयम् ।

ऊहः—व्याकरणाध्ययनस्य प्रयोजनान्तरं हि ऊहः । ऊहो नाम आदेशप्रयोजनाभ्यां मन्त्रस्थपदगतलिङ्गविभक्तिवचनपरिवर्तनम् । उक्तञ्च ऋग्वेदे – प्रकृतौ आम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठः ऊहः । इति । तथाहि व्याकरणज्ञानाद् ऋते प्रकृतिवद् विकृतिः कर्तव्या इति वाक्यं मनसि निधाय आग्नेयवत् सौर्यः अनुष्ठेयः इति विधिवाक्यं स्मरन्नपि सूर्यकर्मणि अग्नये त्वा जुष्टं निर्वपामि इति मन्त्रस्थले सूर्याय त्वा जुष्टं निर्वपामि इति मन्त्रं पठितुं न शक्नुयात् । अतः ऊहार्थं व्याकरणम् अध्येयम् । उक्तञ्च भाष्यकृता – ऊहःखल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणयितव्याः । तां नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्माद् अध्येयं व्याकरणम् ।

आगमः- व्याकरणस्य तृतीयं प्रयोजनं हि आगमः । श्रुतिः शास्ति –ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येयो ज्ञेयश्च इति । श्रुतेः आदेशस्य अपालने प्रत्यवायोत्पत्तिः । एवं श्रुत्यादेशम् अनुसृत्य प्रत्यवायपरिहाराय वेदपुरुषस्य अङ्गभूतत्वात् वेदार्थज्ञानस्य व्याकरणाधीनत्वात् च अध्येयं व्याकरणम् । तदुक्तं महाभाष्ये – आगमः खल्वपि । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो अध्येयो ज्ञेयश्च । प्रधानं च षट्सु अङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । इति ।

लघुता—लघुतासाधनार्थं हि व्याखरणम् अध्येयम् । प्रतिपदपाठेन शब्दज्ञानम् असम्भवं शब्दानाम् आनन्त्यात् । आम्नातं च श्रुतौ—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम ॥ इति । तस्मात् एव व्याकरणम् अध्येयम् । तदुक्तं भाष्ये –न चान्तरेण व्याकरणं लघुना उपायेन शब्दाः शक्याः ज्ञातुम् ॥ इति ।

असन्देहः—संशीतिशातनाय अध्येयं व्याकरणम् । ननु कथंकारं तत् संशीतिशातनम् इति चेत्- अत्रोच्यते – याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत ॥ इति । अत्र स्थूला चासौ पृषती चेति स्थूलपृषती इति कर्मधारय उत स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती इति बहुव्रीहिसमासः जात इति सन्देहः । अत्र तु स्वरज्ञानेनैव संशीतिशातनं भवति । स्वरज्ञश्च अवैयाकरणो भवितुं नालम् । अतः स्वरसन्देहनिरसनाय अध्येयं व्याकरणम् इति । भणति च भाष्यकारः—

असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति – स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत इति । तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती इति । तां नावैयाकरणः स्वरतः अध्यवस्यति इति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः । अथान्तोदात्तत्वं ततस्तत्पुरुषः इति ।

इति शम् ।